न वेदवाह्यपुरुषे पुण्यलेशोऽपि शङ्कर ! ॥
सञ्जच्छते महादेव ! धर्म्मो वेदाद्धि निर्ब्बभौ ।
तथापि भक्तवात्सल्याद्रक्षितया महेश्वर ! ॥
अस्माभि: सर्व्व एवैमे गन्तारो नरकानपि ।
अस्माद्वै वेदवाह्यानां रक्षणाय च पापिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ! ॥
एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरित: ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रश: ॥"

इति कौर्म्मे १४ अध्याय: ॥

मोहिनी, स्त्री, (मोहयति सौन्दर्य्यादिनेति । मुह + णिच् + णिनि: । स्त्रियां ङीप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ (वटपत्री । तत्पर्य्यायो यथा,—
"वटपत्री तु कथिता मोहिनी रेचनी बुधै: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
समुद्रमन्थनकाले देवानामम्टतपानायासुराणां मोहनाय च भगवदवतारविशेष: । यथा,—
"धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्याय: ॥

स्वर्व्वेश्याविशेष: । यस्या: शापात् ब्रह्मणोऽपूज्यत्वं जातम् । यथा,—
"यतो हससि गर्व्वेण ततोऽपूज्यो भवाचिरम् ।
अचिराद्दर्पभङ्गं ते करिष्यति हरि: स्वयम् ॥
निबोध शरणं ब्रह्मन् ! स्वर्व्वेश्यायाश्च साम्प्रतम् ॥
तत्रैव कवचं स्तोत्रं मन्त्रं गृह्णाति यो नर: ।
भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघाश्च संक्रान्त्यां न भविष्यति सा पुन: ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विज्वरा पुन: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३१ अध्याय: ॥
विस्तरस्तु ब्रह्मन्शब्दे द्रष्टव्य: ॥ (मोहकर्त्तरि त्रि । यथा, भागवते । ३ । ६ । ३५ ।
"अतो भागवती माया मायिनामपि मोहिनी ।
यत् स्वयञ्चात्मवर्त्मात्मा न वेद किमुतापरे ॥")

मौकुलि:, पुं, काक: । इति हेमचन्द्र: । ४ । ३८८ । (यथा, उत्तररामचरिते २ अङ्के ।
"कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत् कीचकस्तम्बाडम्बरमूकमौकुलिकुल: क्रौञ्चावतोऽयं गिरि: ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिता: कूजितैरुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसा: ॥")

मौक्तिकं, क्ली, (मुक्तैव । मुक्ता + "विनयादिभ्यष्ठक् ।" ५ । ४ । ३४ । इति ठक् ।) मुक्ता । इत्यमर: ।२।६।९२॥ (यथा, चाणक्यशतके ।५५।
"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्व्वत्र चन्दनं न वने वने ॥"
तथास्य पर्य्याय: ।
"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुल:, पुं, (मौक्तिकमिव शुक्ल: तण्डुलोऽस्य ।) धवलयावनाल: । इति राजनिर्घण्ट: ॥

मौक्तिकप्रसवा, स्त्री, (मौक्तिकस्य प्रसवा ।) शुक्ति: । इति राजनिर्घण्ट: ॥

मौक्तिकशुक्ति:, स्त्री, (मौक्तिकानां शुक्ति: ।) शुक्ति: । इति राजनिर्घण्ट: ॥ मुक्तार झिनुक इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धाधीनपापम् । तत्तु अभक्ष्यभक्षणरूपं तच्च क्लीवम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । मुमन्तु: । यश्च तैर्यौनमौखश्रौवाणां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्यापितदेव प्रायश्चित्तं विदध्यात् । दद्यात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थ: । अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते । इति शूलपाणिकृतप्रायश्चित्तविवेक: ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वम् । मुखरस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे णिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला ॥ (यथा, शिशुपालवधे । १ । ६ ।
"पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताम्बराधरां
विडम्बयन्तं शितिवाससस्तनुम् ॥"
"मुञ्जस्तृणविशेषस्तन्मयीमेखला मौञ्जी ।" इति तट्टीकायां मल्लीनाथ: ॥) यथा,—
"विप्रस्य क्षत्रियस्यापि मौञ्जी स्याद्दक्षिणायने ।
दक्षिणे च विशां कार्य्यं नानध्याये न संक्रमे ॥"
मनु: ।
"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य च मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
मुञ्जालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजै: ।
त्रिवृता ग्रन्थिनैकेन त्रिभि: पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीतृणाख्य:, पुं, (मौञ्जीतृणमित्याख्यास्य ।) मुञ्ज: । इति राजनिर्घण्ट: ॥

मौञ्जीपत्रा, स्त्री, (मौञ्जीपत्रमिव पत्रमस्या: ।) वल्वजा । इति राजनिर्घण्ट: ॥

मौञ्जीबन्ध:, पुं, (मौञ्ज्या बन्ध: बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,
"जन्मभाद्दशमे सिंहे नीचस्थे शत्रुभे गुरौ ।
मौञ्जीबन्ध: शुभ: प्रोक्तश्चैत्रे मीनगते रवौ ॥"

इति ज्योतिर्निबन्धे नारदवचनम् ॥

मौढ्य, क्ली, (मूढस्य भाव:कर्म्म वा । मूढ + "गुणवचनब्राह्मणादीभ्य: कर्म्मणि च ।" ५।१।१२४ । इति ष्यञ् ।) मोह: । इति हेमचन्द्र: ।२।२३४॥ (यथा, श्रीमद्भागवते । ३ । २९ । २२ ।
"यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्च्चां भजते मौढ्याद्भस्मन्येव जुहोति स: ॥"
पुं, मूढस्यापत्यम् । मूढ + "कुर्व्वादिभ्यो ण्य: ।" ४ । १ । १५१ । इति ण्य: । मूढपुत्र: । इति व्याकरणम् ।)

मौद्गलि:, पुं, काक: । इति त्रिकाण्डशेष: ॥

मौद्गल्य:, पुं, (मुद्गलस्यापत्यमिति । मुद्गल + ष्यञ् ।) मुद्गलमुनिपुत्र: । स च गोत्रकारक: । अस्य पञ्च प्रवरा: यथा । और्व्वच्यवनभार्गवजामदग्न्याप्नुवन्त: । इति कुलदीपिका ॥ (यथा, हरिवंशे । ३२ । ७० ।
"मुद्गलस्य तु दायादो मौद्गल्य: सुमहायशा: ।)

मौद्गीनं, क्ली, (मुद्गानां भवनं क्षेत्रमिति । मुद्ग + "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) मुद्गभवोचितक्षेत्रम् । इत्यमर: । २ । ९ । ८ ॥

मौनं, क्ली, (मुनेर्भाव इति । मुनि + अण् ।) शब्दप्रयोगराहित्यम् ॥ तत्पर्य्याय: । अभाषणम् २ । तूष्णीम् ३ तूष्णीकाम् ४ । इत्यमर: ।३।७।३६ ॥ (यथा, रघुवंशे । १ । २२ ।
"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्यय: ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥")
कर्म्मविशेषे मौनाचरणं यथा,—
"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥"

इति तिथ्यादितत्त्वम् ॥

मौनी, [न्] पुं, (मौनमस्यास्तीति । मौन + "अत इनिठनौ ।" ५।२।११५ । इति इनि: ।) मुनि: । इति जटाधर: ॥ (यथा, मार्कण्डेये ।७५।३९ ।
"तत: स चिन्तयामास राजा चामात्यकारणम् ।
विवेद च न तन्मौनी जरद्वेऽर्थेष तं नृप: ॥")
मौनयुक्ते, त्रि । यथा,—
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥
एतच्च मौनमरुणोदयमारभ्य स्नानपर्य्यन्तं कार्य्यं न तु स्नानकालमात्रे ।" इति तिथ्यादितत्त्वम् ॥

मौनेय:, पुं, (मुनेरपत्यं पुमान् । मुनि + "इतश्चानिञ: ।" ४।१।१२२ । इति ढक् ।) गन्धर्व्वगणविशेष: । यथा,—
"गन्धर्व्वाप्सरस: पुण्या मौनेयांस्तु निबोधत ।
चित्रसेनोग्रसेनौ तु ऊर्णायुरनिघस्तथा ॥
धृतराष्ट्रस्तथोमाश्च सूर्य्यवर्च्चास्तथैव च ।
युगतृणपत्काष्णौ निदिष्टश्चित्ररथस्तथा ॥
त्रयोदश: शालिशिरा: पर्य्यण्यश्च चतुर्द्दश: ।
इत्येते देवगन्धर्व्वाश्चतुस्त्रिंशच्छुभास्वरा: ॥"

इति वह्निपुराणम् ॥